SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 28/12/2024
Volume – 6
Issue – 2
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# प्रारम्भिक-बाल्यावस्थायाः पालनं शिक्षणं च

*विष्णु प्रसाद उपाध्याय*

*बलति मस्तकं रक्षति संवृणोति इति बालः – 'बल 'प्राणने इति धातोः ण-प्रत्यये कृते सति बालः इति रूपं सिध्यति । बालः एव बालकः स्वार्थे कन् ।*

**विष्णु प्रसाद उपाध्याय**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
Email: bishnupoudel1992@gmail.com
mob. 8417997951

**प्रस्तावना**

**प्राक् चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः ।**
**कुमारस्तु स विज्ञेयो यावन्मौञ्जी न बन्धनम् ।।**[1]

(चूडाकर्मणः पूर्वं बालः भवति, अन्नप्राशनात् पूर्वं शिशुः भवति, मेखलाबन्धनात् पूर्वं कुमारः भवति।)
अस्मिन् संसारे बहुविधाः जनाः सन्ति, केचन मन्दमतयः, केचन प्रत्युत्पन्नमतयः, केचन तीव्रकोपाः, केचन सर्वदा शान्ताः उत्साहिनः, धर्मप्रियाः, अधर्मासक्ताः, परोपद्रवतृप्ताः, परोपकारनिरता इति । एकस्मिन्नेव कुले जातानां भ्रातॄणाम्, एकस्मिन् ग्रामे निवसतां च मनुष्याणां विचाराः विभिन्नाः दृश्यन्ते, रुचिश्च भिन्ना भवति। केचन अन्यैः सह व्यवहारं कर्तुं समर्थाः भवन्ति। केचन स्वकार्यमपि निर्वोढुमशक्ताः परमुखप्रेक्षिणः भवन्ति। तथा च एकैकोऽपि मनुष्यः आकारे आशये च अन्यस्मात् भिन्नः भवति । अत्र किं कारणमिति विचारणीयम्। अस्मिन् लोके जीवनं सभ्यं सम्पादनीयम्। कोपादयः अनभिलषणीयाः अवगुणाः निरोद्धव्याः वर्तन्ते। एतत्सर्वं कथं कर्तुं शक्यते ? इति तुल्येऽपि मनुष्ये, अस्ति केषुचित् नरेषु विशिष्टं परकीयमनोज्ञानं, येन ते स्वं जीवनं सभ्यं वर्तयितुं शक्नुवन्ति।

**उक्तञ्च**

**'परेङ्गितज्ञानफला हि बुद्धयः**[2] **।**

पितुः पुत्रस्य, भार्यायाः पत्युश्च परस्परं मनसः अवगतिः यदि भवति तर्हि तयोः पारस्परिकः व्यवहारः सर्वोऽपि अनुकूलः भवति । मनुष्याः जनसमाजे सम्भूयैव वसन्ति, तथा च मनुजानां मध्ये निवसतः यस्य मनुष्यस्य मानवमनोज्ञानं वर्तते स एव सुष्ठु जीवितुमपि शक्तः भवति । न केवलं मानवमनोज्ञानं किन्तु पश्वादीनां मनोज्ञानमप्यपेक्षितमेव।

चैतन्यवन्तः सर्वे जीवाः अहर्निशं विपरिणमानाः वर्तन्ते। विपरिणामश्च जीवतां जनानामसाधारणो धर्मो वर्तते। यत्र न विपरिणामः तत्र अजीवत्वम् अवसेयं भवति। मनुष्योऽपि प्रतिक्षणं विपरिणममानः वर्तते। अत्र बौद्धानां क्षणिकवादः स्मर्तव्यः। जातस्य मनुष्यस्य जननक्षणात् प्रभृति मरणपर्यन्तं बहवः विपरिणामाः शरीरे मनसि च जायमानाः वर्तन्ते। इमान् विपरिणामानेव अवस्थानाम्ना **बाल्य-कौमार-यौवन**-भेदेन त्रिधा विभजन् शास्त्रकाराः।

**पिता रक्षति कौमारे भर्ता रक्षति यौवने।**
**रक्षन्ति स्थविरे न स्त्री स्वातन्त्र्यमर्हति ।।**[3]

आधुनिकविद्वांसः सप्तधा विभजन्ते मनुष्यावस्थाः –

1. **शैशवावस्था २. कौमारावस्था ३. किशोरावस्था ४. प्रौढावस्था ५. मध्यमावस्था ६. ह्रासावस्था ७. वृद्धावस्था।**

अत्र याः दशाः निर्दिश्यन्ते ताः सामान्यतः सर्वेषु मनुष्येषु भवेयुः। का च दशा कस्मिन् दिने उत्पद्यते इति वक्तुं नैव शक्यम्।

मनोविज्ञानसिद्धान्तानुगुणम् इदम् अवगम्यते यद् उपाध्यायस्य शिक्षकस्य वा बालज्ञानम् अवश्यम् अपेक्षितम्। अनुभूयते एव यत् केचन बालाः बुद्धिमन्तः, केचन मध्यमाः केचन मन्दबुद्धयः इति भवन्ति । पाठशालासु समानवातावरणे विद्यार्थिनां बुद्धिविषये विभिन्नाः भेदाः दृश्यन्ते। बालस्य मनसः ज्ञानं तदनुगुणमेव सम्पादनीयम् इति शिक्षाविदाम् अभिमतम्।

जननादारभ्य पञ्चमवर्षं यावत् शैशवावस्था भवति। उक्तञ्च –

---

*[1] गोपालन्यायपञ्चाननकृतस्मृतिनिर्णयः*

*[2] हितोपदेशः, सुहृद्भेदः ४९*

*3 मनुस्मृतिः ९.३*

**कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।**
**कैशोरमापञ्चदशात् यौवनन्तु ततः परम्॥**[4]

*(१ तः ५ वर्षपर्यन्तं कौमारावस्था, ६ तः १० वर्षपर्यन्तं पौगण्डावस्था, ११ तः १५ वर्षपर्यन्तं किशोरावस्था, तदनन्तरं यौवनावस्था भवति।)*

शैशवावस्था सर्वासाम् अवस्थानां प्रधानभूता। इयं हि दशा भविष्यत्काले सर्वावस्थायाः उपचयानामपि मूलं कारणं भवति।

जनिकाले शिशोः भारः सामान्यतः षट्-पौण्ड्-परिमितः स्यात्। दैर्घ्यं च 20, 22 इंच्-परिमितं भवेत्। शरीरवृद्धिः द्रुततरा। जायमानदशायामपि शिशूनां परस्परं भेदो वर्तते। अयं भेदः वंशधर्मकृतः भवति। क्वचित् गर्भिण्याः मातुः शरीरस्य आरोग्यानारोग्ययोः पुष्यपुष्टयोश्च कारणत्वं भवति।

**भागवते शिशोः गर्भकाले वृद्धि/पालनप्रक्रिया -**

**कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम्।**
**दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्॥**[5]
**मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याङ्गविग्रहः।**
**नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः॥**[6]
**चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः।**
**षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे॥**[7]
**आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः।**
**नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः॥**[8]

*(रजवीर्ययोः मेलनानन्तरम् एकस्यां रात्रौ भ्रूणः, पञ्चसु रात्रिषु बुद्बुदाकारः, दशसु दिनेषु कर्कन्धूसमानः, तदनन्तरम् अण्डाकारः भवति। प्रथमे मासे शिरः, द्वितीये मासे हस्तपादादीनामङ्गानां विकासः तृतीये मासे नख-लोम-अस्थि-त्वचां स्त्रीपुरुषयोः चिह्नमथ च विभिन्नानां छिद्राणां विकासः, चतुर्थे मासे मांसादीनां सप्तधातूनां पञ्चमे मासे बुभुक्षा-पिपासयोः उत्पत्तिः भवति। षष्ठे मासे जरायुणा वीतः सन् दक्षिणे कुक्षौ भ्रमति। सप्तमात् मासात् आरभ्य तस्मिन् ज्ञानस्योदयो भवति।)*

पूर्वार्धकायश्च पादपरिमाणापेक्षया दीर्घः भवति। पादप्रसारणाय हस्तचालनाय च अपेक्षिता पेशीशक्तिः अपूर्णा भवति, तेन कारणेन श्रान्तिश्च अधिका जायते। अतः चिरकालं यावत् स्वपिति शिशुः। केनचित् जनेन प्रेरिते सति प्रतिक्रिया सम्पूर्णे शरीरे जायते न त्वेकस्मिन् अवयवे इति। पादयोः चलनावस्थायां सम्पूर्णं शरीरं चलति। उभे अपि चक्षुषी संगत्य दर्शनं न कुरुतः। विंशतिदिनेभ्यः परमेव उभे अपि नेत्रे परस्परं साहाय्यं प्राप्य एकं वस्तु द्रष्टुं शक्नुयाताम्। यद्यपि रसनेन्द्रियं रसं जानीयात् तथापि विशिष्टसंज्ञानं तु कतिपयेभ्यः मासेभ्यः परमेव भवेत्। जातः शिशुः शब्दसंवेदनं न लभेत। केभ्यश्चन दिनेभ्यः परमेव शब्दज्ञानं भवति। क्रमशः शब्दः यस्या दिशः आयाति तां दिशं द्रष्टुम् उत्सुको

---

[4] *भक्तिरसामृतसिन्धुः २.१.३०९*
[5] *श्रीमद्-भागवतम्, ३. ३१, २*
[6] *श्रीमद्-भागवतम्, ३. ३१, ३*
[7] *श्रीमद्-भागवतम्, ३. ३१, ४*
[8] *श्रीमद्-भागवतम्, ३. ३१, १०*

भवति । प्रदर्शितं वस्तु ग्रहीतुं प्रयतेत । जीवने अपेक्षिताः सर्वा अपि तन्त्रिकाः जननकाले एव वर्तन्ते । पूर्णरूपेण वृद्धिस्तु पश्चादेव जायते । प्रथमे वर्षे मस्तिष्कं वर्धते । स्वेच्छानुसारं जलं पातुं मूत्रयितुं मलमुत्स्रष्टुं च अपेक्षितान् शारीरिकव्यापारान् क्रमशः जानाति । तृतीये अथवा चतुर्थे मासे अधोमुखः शयितुं, षष्ठे उरसा सर्पितुं, नवमे उपवेष्टुं, द्वादशे मन्दं मन्दं किमपि अवलम्ब्य पादाभ्यां चलितुं च शक्नुयात् । अत्र व्यक्तिविशेषेषु प्रगति: अन्यप्रकारेणापि स्यादिति अयमंशः नैव विस्मर्तव्यः । शिशोः भारः वर्षान्ते जननकालभारापेक्षया त्रिगुणितः स्यात् ।

जातस्य शिशोः *प्रथमं क्षुधा एव प्रधानं* भवति । बाह्यप्रेरणानुगुणं चेष्टा नैव स्यात् । पश्चात्तु प्रकाशावलोकनम्, मातृमुखावलोकनं, तत्र सन्तोषः, तस्य च अभिव्यक्तिः मन्दहासेनेति । एवं क्रमेण बाह्यज्ञानं क्रमशः इन्द्रियैः उत्पाद्यते । प्रथमम् अविभक्तं स्थूलं च ज्ञानं स्यात् । ततश्च शनैः शनैः विस्तृतं ज्ञानं भवेत् ।

संवत्सरे पूर्णे शिशुः श्रुतभाषानुगुणं 'मामा, पापा, ताता, दादा इत्यादीनि कानिचन पदानि प्रतिवक्तुं तदर्थमवबोद्धुं च शक्नुयात् । प्रवर्धमानस्य शिशोः अवधानशक्तिश्च विस्तरेण भवति । इन्द्रियैः कृतान् बाह्यप्रेरकान् ज्ञात्वा तदनुगुणं वर्णान् उच्चारयितुम् आरभते ।

रघुः अपि अस्मिन् एव वयसि वर्णान् उच्चारयितुमारब्धवान् –

**स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।**
**लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशतम् ।।**[9]

*(मुण्डनसंस्कारानन्तरं रघुणा समानवयोवद्भिः मन्त्रिपुत्रैः सह उपविश्य पूर्वं वर्णमालां पठितुम् आरब्धमान्, तदनन्तरं साहित्यशास्त्राणामध्ययनम् आरब्धवान्।)*

*अस्मिन् वयसि स्मरणशक्तिश्चाधिका भवति । एकदैव बहून् पदार्थान् द्रष्टुं ज्ञातुं च प्रभवति शिशुः । वर्षत्रयानन्तरं प्रायशः शिशुषु कल्पनाशक्तिः मनोरथकल्पना च अधिका वर्तते । अभिनयः भावनाक्रीडा च शिशूनां कल्पनाशक्तिं वर्धयति*[10] । अभिज्ञानशाकुन्तले सप्तमाङ्के दुष्यन्तपुत्रः भरतः सिंहशावकेन सह क्रीडति –

**अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।**
**प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ।।**[11]

*(पुत्रः भरतः सिंहशावकेन सह क्रीडितुम् अर्धदुग्धं पीतवन्तं सिंहशावकं बलपूर्वकं कर्षयित्वा स्वसमीपम् आनयति, तदनन्तरं सिंहशावकं वदति, स्वमुखम् उद्घाटय रे, अहं तव दन्तात् गणयामि)*

**स वै भागवतो राजा पाण्डवेयो महारथः ।**
**बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ।।**[12]

*(पाण्डुनन्दनः महारथी राजा परीक्षित् भगवतः तादृशः भक्तः आसीत्, यत् बाल्यावस्थायां क्रीडनकाले अपि भगवतः श्रीकृष्णस्य लीलायाः रसमेव स्वीकरोति स्म )*

मृच्छकटिकस्य षष्ठे अङ्के चारुदत्तस्य पुत्रः रोहसेनः मृत्तिकया निर्मितेन वाहनेन सह क्रीडति[13] । हर्षचरिते दशकुमारचरिते च बालाः विभिन्नैः जीवजन्तुभिः क्रीडन्ति । अतः एव उक्तम्, क्रीडाः शिशूनां कल्पनाशक्तिं वर्धयति । कदाचित् आत्मानं मातरं पितरं मार्जारं वा मन्येत । मृगपक्षिकथासूत्साहं दर्शयति। जिज्ञासागुणश्चाधिकः । किम् ? कुतः इत्येवं प्रश्नाः क्रियन्ते । पितरः प्रभानामुत्तरं सम्यक् कथयन्ति चेत् तर्हि तत् बालानां बुद्धिविकासकारणं भवति ।

---

[9] *रघुवंशः ३. २८*

[10] *काकजम्बुकयोः कथा । अत्र जम्बुकेन यदा अपूपः अपहृतः, तदा शिशुः काकः सद्य रुदन् स्वमातृसमीपं गतः, माता काकी च पञ्च पणान् दत्त्वा अन्यत् अपूपं क्रीत्वा स्वशिशवे दत्तवती ।*

[11] *अभिज्ञानशा. ७.१४*

[12] *भागवतम् – १-३-१५*

[13] *एहि वत्स ! शकटिकया क्रीडावः । रदनिके ! किं मम एतया मृत्तिकाशकटिकया, तामेव सौवर्णशकटिकां देहि । (मृच्छकटिकम्)*

अस्यामेवास्थायां रचनाभावाश्च आत्मानं प्रदर्शयन्ति । अत एव सिकतागृहनिर्माणादिकं कुर्वन्ति हस्ताभ्यां किमपि कर्तुमुद्युक्ता भवन्ति । अस्यां दशायामुत्पादितः सर्वोऽपि संस्कारः दृढतरमाहितो भवति । प्राथमिकपञ्चसु वर्षेषु बहूनि पदानि ज्ञातानि भवन्ति । तस्मिन् काले यत्किमपि अर्थात् सत्यासत्यं वाच्यावाच्यं बालः सर्वं गृह्णाति, किन्तु तस्मिन् वयसि एतत्सर्वं दोषत्वेन न गण्यते ।

**भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ।**
**तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते ।।**[14]

*(यावत्पर्यन्तं बालस्य उपनयनसंस्कारः न भवति, तावत्पर्यन्तं भक्ष्याभक्ष्य-पेयापेय-वाच्यावाच्य-सत्यासत्याः एते दोषाः न भवन्ति।) उपनयनसंस्कारात् पूर्वं बालः अज्ञः मन्यते – उक्तं च*

**अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।**
**अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ।।**[15]

पदज्ञानोपचयः प्रायशः कुटुम्बपरिवेषमाश्रित्य वर्तते । बुद्धिमन्तौ विद्वांसौ पितरौ अधीयानाः सोदराः सोदर्यश्च शिशोः पदसम्पदुपचयं प्रत्युत्तरदानसमालाप-कथाकथनादिभिः कुर्वन्ति । यत्र एतादृशः परिवेषो न भवति तत्र पदज्ञानमत्यल्पमेव भवेत् ।

**बालानां संवेगावस्था**

जातस्य शिशोः संवेगः प्रथमं कांश्चन सप्ताहान् केवलस्थूलसंवेदनरूपेण स्यात् । चतुर्भ्यः मासेभ्यः परमेव इदं संवेदनं कोप-भय-प्रीत्यात्मनाविर्भवति । स्वेच्छानुरोधेन क्रियमाणेषु पादचालनादिषु प्रतिबन्धे जाते सति कोपः भवति । सपदि उद्धियमाणे भयं मृदुस्पर्शेन प्रीतिश्च जायेते । एते च संवेगाः क्रमशः अन्यैरपि प्रेरकैः उद्भवन्ति । प्रीतिं हासेन आविर्भावयति । कोपं रोदनेन, दंशनेन, ताडनेन वा प्रकाशयति । पश्चात्तु निन्दाद्योतकस्वैररपि कोपः सूच्यते । अस्याम् अवस्थायां शिशूनां सर्वमपि कार्यं पितृभ्यामेव कर्तव्यं वर्तते। शिशवः पितृतः प्रीतिम् अपेक्षन्ते । पितृप्रीतिरेव तेषां सुरक्षितत्वबुद्धिं जनयति । पितृभिः एतादृशी बुद्धिः अवश्यमुत्पादनीया ।

यत्र एतादृशः परिवेषः न भवति तत्र बुद्धिविकासोऽपि प्रतिहतः भवति । शिशुः प्रीत्या पोषणीयः । गृहे वर्तमानः प्रीतिपूर्णः परिवेष एव शिशुं वर्धयेत ।

दम्पत्योः कलहेन, तत्रापि शिशोः पुरत एव परस्परं ताडनभर्त्सनादिना च शिशोः संवेगोऽसमीचीनः भवति। अनाथगृहेष्वपि प्रीतिपूर्णः परिवेष एव सम्पादनीयः । बाल्ये अलब्धप्रीतयः शिशवः पश्चात् प्रवयसि जनताविद्वेषिणः समाजाहितकारिणश्च जायन्ते । बालः मातरि प्रीतिं पितरि प्रीतिं द्वेषम् असूयां च करोति । एवं बालिकायाः स्वमातरि द्विविधः संवेगो वर्तते । पश्चात्तु एवं द्विमुखः संवेगो न भवतीत्यपि अभिप्रैति । एतादृशः संवेगग्रन्थिः व्यक्तित्वाभिवृद्धिं बाधते इति विज्ञानिनः । शिशुः मात्रा अनुजे प्रदर्शितां प्रीतिं दृष्ट्वा तस्मै असूयेत ।

**बालस्य सामाजिकपरिवेशः**

जातः शिशुः प्रथमं प्रायः मातृरूपं परिवेषं जानाति । मात्रा कृतः परिचय एव तस्य तस्याः वा प्राथमिकः सामाजिकः परिवेषो भवति । पश्चात् गृहे स्थितैः अन्यैर्जनैः परिचयो जायते । कुटुम्बजनानां मध्ये आत्मानमेव प्रधानं मत्वा परैः क्रियमाणं लालनमपेक्षते । क्रीडापि अन्यैः शिशुभिः सह न भवति, क्रमशः वर्षत्रयात्परं परैः शिशुभिः सम्पर्कः इच्छति ।। अस्मद्देशेऽपि बालोद्याननाम्न्यः पाठशालाः इदानीं प्रतिष्ठाप्यन्ते ।

---

14 *स्मृतिग्रन्थाः*

15 *मनुस्मृतिः २.१५३*

**माता शत्रुः पिता वैरी येन बालो न पाठितः ।**
**न शोभते सभामध्ये हंसमध्ये बको यथा ।।** [16]

बालोद्यानेषु द्वितीयवर्षात् प्रभृति पञ्चमं वर्षं यावत् बालाः प्रवेशायानुमन्यन्ते । परिवर्धनानुकूलः परिवेषोऽत्र कल्पितो वर्तते । तर्जनभर्त्सनादिकं नैव भवति । शिशुभिः क्रियमाणं परस्परताडनं निवार्यते । शयनाय मृदुशयनादिकमत्र कल्पितं वर्तते । आधुनिकशिक्षासिद्धान्ते शारीरं सौख्यं, सदाचरणम्, इतरैः सह वर्तनम् इत्येवमादयो ये गुणाः शिक्षाकलायां मुख्यत्वेन मन्यन्ते ते अत्र शिशोः अनुकूलं परिवेशं कल्पयन्ति। क्रीडोपकरणान्यपि दीयन्ते । पाठ्यचर्या काप्यत्र न भवति । अध्यापनमपि न वर्तते । बालाः स्वेच्छया अन्यैः बालकैः सह विहरन्तः शरीराभिवृद्धिं, सामाजिकज्ञानं मनोविकासं च प्राप्नुवन्ति । सम्पूर्णदिनं मातृभिः वियुक्ताः शिशवः सायं मातरं द्रष्टुं सोत्सुकाः भवन्ति । मातरश्च शिशून् सोत्कण्ठं प्रतीक्षन्ते । सौन्दर्यानुभूतिरप्युद्भवति बालानाम् । इतरैः सह स्थितिः इति शिशुः स्वयमेव जानाति । सङ्कोचादिकं च परित्यजति ।

**पञ्चमवर्षात् परं दशा**

**चतुर्थाद्वत्सरादूर्ध्वं यावदष्टौ समा वयः ।**
**शिशोर्व्रतं प्रकुर्वन्ति गुरुसम्बन्धिबान्धवाः ।।**[17]

अस्यामेव दशायां पाठशालां प्रविष्टः बालः स्वकुटुम्बेतरैः सह परिचयं लब्धुमवकाशं प्राप्नोति । चित्रयुक्तानां पुस्तकानामवलोकने रुचिः भवति । अतः पाठशालासु चित्रवन्ति पुस्तकानि सम्पादनीयानि। साप्ताहिक-पाक्षिक-मासिकपत्रिकाः मातृभाषायां प्रकाश्यमानाः अत्र उपकुर्युः । अस्यां दशायां कुमाराणां पृथग्वर्तितुं नैव स्पृहा वर्तते । अन्यैः कुमारैः सह वर्तनं क्रीडनं चैभ्यो बहुरोचते । अत एवास्याः दशायाः गणवयः इत्यपि नाम । । अस्यां दशायां पर्यटने रुचिः स्यात् । अत एव कक्ष्यां परित्यज्य अपि बालाः वर्तेरन् । तस्मात् उपाध्यायैः समीचीनः पर्यटन-अवकाशः देयः । प्राकृतिकसौन्दर्यदर्शनाय तत्तत्स्थलीं प्रति बालाः नेतव्याः । गृहहितादपि गुरुकुले विद्यमानानां सुहृदां हितं च एषां प्रधानं भवति । गुरुकुलीयवातावरणे एतेषां संलग्नं सहजतया कर्तुं शक्नुमः -

**नित्यं स्नात्वा शुचिः कुर्यात् देवर्षिपितृतर्पणम् ।**
**देवताभ्यर्च्चनञ्चैव समिदाधानमेव च ।।**[18]
**प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुम् ।**
**अध्यापयेच्च प्रथमं द्विजाशीर्भिः प्रपूजितम् ।।**[19]

यथा पाठशालाधिकारिभिः उच्यते, बालाः स्वगणहितमेव अन्याय्यमपि न्याय्यत्वेन गणयन्ति ।

**सारांशः**

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।**
**वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।**[20]
**प्रथमे नार्जिता विद्या द्वीतीये नार्जितं धनं ।**
**तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ।।**[21]

---

[16] *हितोपदेशः - ३८*

*17 ब्रह्मपुराणम्*

[18] *शब्दकल्पद्रुमः*

[19] *मलमासतत्त्वे बृहस्पतिवचनम्*

[20] *रघुवंशम् – १. ८*

*21 सुभाषितसंग्रहः*

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ।।[22]

ततश्च उपाध्यायैः पितृभिश्च एतादृशविषयेषु यथा संकटदशायां बाला न भवेयुः तथा आचरितव्यम् । अस्यां दशायां बालाः सम्भूय कार्यकरणेऽपि रुचिं प्रकटयन्ति । ततश्च पाठशालालङ्करणादिकार्येषु एतेषां नियोजनम् अभिनन्दनीयम् । वस्त्वर्जनरुचिरधिका स्यात् । तस्मादेव निरुपयोगीनि अपि बहूनि वस्तूनि सञ्चिन्वन्ति । बाह्यवृत्तान्तेषु आसक्तिः स्यात् । शिक्षणं च मनोविज्ञानानुसारि स्यात् । तदनुगुणः शारीरः विकासः मानसो विकासश्च जायेते[23] ।


**सन्दर्भग्रन्थाः**

- हितोपदेशः
- मनुस्मृतिः
- भक्तिरसामृतसिन्धुः
- श्रीमद्भागवतम्
- रघुवंशम्
- अभिज्ञानशाकुन्तलम्
- मृच्छकटिकम्
- स्मृतिग्रन्थाः
- अथर्ववेदः
- ब्रह्मपुराणम्
- शब्दकल्पद्रुमः
- मनोविज्ञानम्


22 *रघुवंशम् – १.६९*

[23] *वे. श्री. वेङ्कटराघवाचार्यस्य मनोविज्ञानम् (मुद्रणम् - १९७१)*